श्री ललिता स्तोत्रं (ब्रह्मादि कृतं)

श्री ललिता स्तोत्रं (ब्रह्मादि कृतं)

ब्रह्माद्या ऊचुः |
नमो नमस्ते जगदेकनाथे
नमो नमः श्रीत्रिपुराभिधाने |
नमो नमो भंडमहासुरघ्ने
नमोऽस्तु कामेश्वरि वामकेशि || 1 ||

चिंतामणे चिंतितदानदक्षे-
-ऽचिंत्ये चिदाकारतरंगमाले |
चित्रांबरे चित्रजगत्प्रसूते
चित्राख्य नित्याभिगते नमस्ते || 2 ||

मोक्षप्रदे मुग्धशशांकचूडे
मुग्धस्मिते मोहविभेददक्षे |
मुद्रेश्वरीचर्चितराजतंत्रे
मुद्राप्रिये देवि नमो नमस्ते || 3 ||

क्रूरांधकध्वंसिनि कोमलांगे
कोपेषु काळी तनुमादधाने |
क्रोडाननापालित सैन्यचक्रे
क्रोडीकृताशेषदये नमस्ते || 4 ||

षडंगदेवी परिवारगुप्ते
षडंगयुक्तश्रुतिवाक्यमृग्ये |
षट्चक्रसंस्थे च षडूर्मिहंत्रि
षड्भावरूपे ललिते नमस्ते || 5 ||

कामेश्वरीमुख्यसमस्तनित्या
कांतासनांते कमलायताक्षि |
कामप्रदे कामिनि कामशंभोः
काम्ये कळानामधिपे नमस्ते || 6 ||

दिव्यौघ सिद्धौघ नरौघरूपे
दिव्ये दिनाधीश सहस्रकांते |
देदीप्यमाने दयया सनाथे
देवादिदेवप्रमदे नमस्ते || 7 ||

सदाणिमाद्यष्टकसेवनीये
सदाशिवात्मोज्ज्वलमंचवासे |
सौम्ये सदेकायनपादपूज्ये
सवित्रि लोकस्य नमो नमस्ते || 8 ||

ब्राह्मीमुखैर्मातृगणैर्निषेव्ये
ब्रह्मप्रिये ब्राह्मणबंधहंत्रि |
ब्रह्मामृतस्रोतसि राजहंसि
ब्रह्मेश्वरि श्रीललिते नमस्ते || 9 ||

संक्षोभिणी मुख्यसमस्तमुद्रा-
-संसेविते संसरणप्रहंत्रि |
संसारलीलाकरि सारसाक्षि
सदा नमस्ते ललितेऽधिनाथे || 10 ||

नित्याकळाषोडशकेन कामा-
-कर्षिण्यधिश्रीप्रमथेन सेव्ये |
नित्ये निरातंकदयाप्रपंचे
नीलालकश्रेणि नमो नमस्ते || 11 ||

अनंगपुष्पादिभिरुन्नदाभि-
-रनंगदेवीभिरजस्रसेव्ये |
अभव्यहंत्र्यक्षरराशिरूपे
हतारिवर्गे ललिते नमस्ते || 12 ||

संक्षोभिणीमुख्यचतुर्दशार्चि-
-र्मालावृतोदार महाप्रदीप्ते |
आत्मानमाबिभ्रति विभ्रमाढ्ये
शुभ्राश्रये शुद्धपदे नमस्ते || 13 ||

ससर्वसिद्ध्यादिकशक्तिबृंद्ये
सर्वज्ञविज्ञातपदारविंदे |
सर्वाधिके सर्वगते समस्त-
-सिद्धिप्रदे श्रीललिते नमस्ते || 14 ||

सर्वज्ञतायुक्प्रथमाभिरन्य-
-देवीभिरप्याश्रित चक्रभूमे |
सर्वामराकांक्षितपूरयित्रि
सर्वस्य लोकस्य सवित्रि पाहि || 15 ||

वंदे वशिन्यादिकवाग्विभूते
वर्धिष्णुचक्रद्युतिवाहवाहे |
बलाहक श्यामकचे वचोब्धे
वरप्रदे सुंदरि पाहि विश्वं || 16 ||

बाणादिदिव्यायुधसार्वभौमे
भंडासुरानीकवनांतदावे |
अत्युग्रतेजोज्ज्वलितांबुराशे
प्रापल्यमाने परितो नमस्ते || 17 ||

कामेशि वज्रेशि भगेशिरूपे
कल्ये कले कालविलोपदक्षे |
कथावशेषीकृतदैत्यसैन्ये
कामेशकांते कमले नमस्ते || 18 ||

बिंदुस्थिते बिंदुकळैकरूपे
ब्रह्मात्मिके बृंहितचित्प्रकाशे |
बृहत्कुचांभोगविलोलहारे
बृहत्प्रभावे वरदे नमस्ते || 19 ||

कामेश्वरोत्संगसदानिवासे
कालात्मिके कंदळितानुकंपे |
कल्पावसानोत्थित काळिरूपे
कामप्रदे कल्पलते नमस्ते || 20 ||

सर्वारुणे सांद्रसुधांशुसीते
सारंगशाबाक्षि सरोजवक्त्रे |
सारस्यसारस्य सदैकभूमे
समस्त विद्येश्वरि सन्नतिस्ते || 21 ||

इति ब्रह्मादिकृत श्री ललिता स्तोत्रं |